Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २४२
जून - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

वेगासुरस्य उपासना

संस्कृते गतिवाचकानां धातूनां प्रमाणम् अधिकम्। यदा गतिः आलस्यं त्यजति तदा वेगस्य स्वरूपं प्राप्नोति। कविभ्यः अपि वेगः रोचते। अभिज्ञानशाकुन्तले प्रारम्भे एव कालिदासः हरिणस्य वेगं वर्णयति। कुमारसम्भवे अपि ऋषयः मनस्तुल्यवेगाः वर्तन्ते। तत्कालीने समाजे एषः वेगासुरः पूजार्हः स्यात्! अद्यत्वे तु वेगस्य महत्त्वं विशेषतः दृश्यते। यानं वा यन्त्रं वा, मनुष्यः वा पशुः वा, यस्य वेगः अधिकः सः विशिष्यते।

परन्तु व्यावहारिके संसारे वेगस्य वर्तनं किञ्चित् विचित्रम् इव प्रतिभाति। वेगस्य प्रभावतः वाणिज्ये, राजनीतौ, कौटुम्बिकजीवने वा महत् परिवर्तनम् अभवत्। गतिः यदा वर्धते तदा लोकः प्रगतिः इति वदति। परन्तु एषा प्रगतिः शीर्षासनं करोति, तदा मनुष्यः अधोगतिं प्राप्नोति। वेगः जीवने उपकारकः एव, परन्तु अत्रापि विवेकः आवश्यकः। अन्यथा एवं भवति –

१. वेगस्य कारणात् मनुष्यस्य ध्यानं शिथिलं भवति। यानचालकः सङ्कटकाले उचितं निर्णयं कर्तुं न शक्नोति। ततः मार्गे दुर्घटनायाः सम्भावना वर्धते। भारते प्रतिवर्षं १२.३ लक्षं जनाः यानेन मरणं प्राप्नुवन्ति।

२. ये मनुष्याः दूरवाणीं सततं पश्यन्ति, ते तत्रत्येषु सर्वेषु विषयेषु वेगम् अपेक्षन्ते। वेगेन परिवर्तमानानि चित्राणि मस्तिष्कस्य दृष्टेः च महतीं हानिं कुर्वन्ति। मस्तिष्कस्य तर्कशक्तिः, दृष्टेः एकाग्रता च शनैः शनैः मन्दा भवति।

३. मनुष्यस्य वेगेन सह रोगाणाम् अपि वेगः वर्धते। मनसा वा शरीरेण वा, सततं धावन् मनुष्यः रोगान् आमन्त्रयते। वेगः दिनचरीम् एव शतधा खण्डशः करोति। गीतायाम् उक्तम् – 'अशान्तस्य कुतः सुखम्?'

४. वेगः गुणवत्तां नाशयति। बाष्पस्थाली झटिति पचति। काष्ठानि मन्दं पचन्ति। किन्तु ओदनस्य स्वादः कुतः लभ्यते? वस्तुतः यः जनः शान्तचित्तेन विचिन्त्य किमपि कार्यं करोति सः कौशलं सिद्धिं च लभते। कबीरः लिखति–

धीरे धीरे रे मना, धीरे सब कुछ होए,
माली सींचे सौ घड़ा, ऋतु आए फल होए।

यः कर्तव्यं निर्वहति सः एव पुत्रः

श्रीपुरवासी विश्वनाथः वृत्त्या अध्यापकः । स्ववृत्तौ तस्य विशेषप्रीतिः । तस्य अध्यापनम् उत्तमम् । अतः विद्यार्थिनः तेषां पितरः च तस्मिन् विशेषतः स्निह्यन्ति स्म।

विश्वनाथस्य पत्नी लक्ष्मीः गुणवती पत्यनुरूपा च। तयोः पुत्रस्य नाम चैतन्यः इति। विश्वनाथः लक्ष्मीः च पुत्रं प्रीत्या पोषितवन्तौ । ग्रामे अध्ययनं समाप्य चैतन्यः अग्रिमाध्ययनाय नगरं गतवान्। उच्चाध्ययनं कृत्वा तत्रैव उद्योगं प्राप्य सः काञ्चित् तरुणीं परिणीतवान्। एतदर्थं मातापित्रोः अङ्गीकारः न प्राप्तः तेन।

पुत्रस्य एतेन व्यवहारेण खिन्नः विश्वनाथः कदाचित् पत्नीम् अवदत् – ''अस्मान् अपृष्ट्वा एव तेन काचित् परिणीता। यदि सः अस्मान् पृच्छेत् तर्हि किं वयं निराकुर्याम ?'' इति।

तस्मिन् एव वर्षे ग्रीष्मविरामकाले सः पत्न्या सह तीर्थयात्रार्थं गतवान्। हरिद्वारे तेन कानिचन दिनानि उषितम्। कदाचित् सः भगवतः दर्शनं प्राप्य मन्दिरस्य पुरतः उपविष्टवान् आसीत्। तदा दशवर्षीयः कश्चन बालकः भिक्षां याचन् तस्य पुरतः आगतवान्।

''वत्स ! एषः अध्ययनार्थं समयः। किमर्थं भिक्षायाचनं क्रियते भवता ? भवतः मातापितरौ किं कुरुतः ?'' इति अपृच्छत् विश्वनाथः।

''षड्भ्यः वर्षेभ्यः पूर्वं मम मातापितरौ नौकादुर्घटनायां प्राणवियोगं प्राप्तवन्तौ। वयं निर्धनाः। मम पितामहः अङ्गविकलः। भिक्षातः यत् प्राप्यते तेनैव आवाभ्याम् उदरं पूर्यते इति दैन्येन अवदत् सः बालः।''

विश्वनाथः तम् अपृच्छत् – ''भवतः नाम किम् ?'' इति। ''मल्लिकः'' इति उक्तं बालेन। ''भवतः अध्ययनाय यदि अहं व्यवस्थां कुर्यां तर्हि किं भवान् अध्ययनं कुर्यात् ?'' इति पृष्टवान् विश्वनाथः।

''अवश्यम्। किन्तु तदा मम पितामहस्य का गतिः भवेत् ?'' इति सातङ्कम् अपृच्छत् मल्लिकः।

''तस्य निमित्तम् अपि योग्यां व्यवस्थाम् अहं करिष्यामि। अध्ययनं किं क्रियेत भवता ?'' इति पुनः अपृच्छत् विश्वनाथः। अङ्गीकारकपूर्वकं शिरः चालितवान् मल्लिकः।

एतदनन्तरं विश्वनाथः पत्न्याः अङ्गीकारं प्राप्य मल्लिकं स्वगृहं नीत्वा अध्ययनाय व्यवस्थां कृतवान्। तस्य पितामहः अपि तेन स्वगृहं नीतः।

कालः गतः। दशवर्षाभ्यन्तरे मल्लिकः उत्तमं शिक्षणं प्राप्तवान्। वृद्धः पितामहः दिवं गतः। विश्वनाथः अपि दिवं गतः। विश्वनाथस्य मरणात् लक्ष्मीः यथा तथैव ग्रामवासिनः सर्वे दुःखं प्राप्तवन्तः। पितुः उत्तरक्रियार्थं पुत्रः चैतन्यः आगन्तुं न शक्तः, यतः कार्यार्थं सः दूरप्रदेशं गतः आसीत्। मल्लिकेन एव विश्वनाथस्य उत्तरक्रिया निर्वर्तिता।

सप्ताहद्वयानन्तरं चैतन्यः श्रीपुरम् आगतवान्। 'समग्रा सम्पत्तिः मल्लिकाय दातव्या' इति पित्रा मृत्युपत्रं लिखितम् इति ज्ञातवतः चैतन्यस्य महान् कोपः। मात्रा सह मया एतद्विषये कलहः करणीयः इति विचिन्त्य सः वेगेन मातुः प्रकोष्ठं प्रति अगच्छत्। तावता प्रकोष्ठे प्रवर्तमानं सम्भाषणं तेन श्रुतम्। सः गमनं स्थगितवान्।

मल्लिकः वदति स्म – ''गुरुवर्येण मम शिक्षणस्य व्यवस्था कृता । पदवीबलेन अहं कुत्रचित् उद्योगं प्राप्नुयाम् एव । एतावत्पर्यन्तं भवन्तौ मां पोषितवन्तौ । मह्यम् आश्रयं, शिक्षणं, प्रीतिं च दत्तवन्तौ । अतः आजीवनं भवत्याः निमित्तं व्यवस्थाकल्पनं मम आद्यं कर्तव्यम् । तदहं करिष्यामि एव । किन्तु एषा सम्पत्तिः मह्यं मास्तु । भवत्याः पुत्राय अहम् एताम् अर्पयितुम् इच्छामि । कृपया अनुज्ञायताम्'' इति ।

एतस्य वचनस्य श्रवणात् चैतन्यः मल्लिकस्य हृदयस्य वैशाल्यम् अवगतवान् । सः अन्तः गत्वा मल्लिकस्य हस्तौ गृहीत्वा– ''भवान् मम भ्रातृसमानः । जन्मना कोऽपि पुत्रत्वं न प्राप्नोति । यः मातापित्रोः विषये स्वकर्तव्यं निर्वहति सः एव वस्तुतः पुत्रः । अतः पैतृकी सम्पत्तिः भवता एव प्राप्ता भवेत् । मम माता नगरं प्रति आगन्तुं न इच्छति । अतः अत्र स्थित्वा भवता एव तस्याः योगक्षेमादिकं द्रष्टव्यम्'' इति अवदत् ।

तस्य प्रार्थनाम् अङ्गीकुर्वन् मल्लिकः ग्रामे एव अवसत् । यत्र अधीतं तस्मिन् विद्यालये एव तेन अध्यापकोद्योगः अपि प्राप्तः । लक्ष्मीं सः मातरं भावयन् प्रीत्या पोषितवान् । लक्ष्मीः यावज्जीवं सन्तोषेण दिनानि यापितवती ।

इन्धनसञ्चयस्य रहस्यम् !

सा काचित् विचित्रा कार्चालनस्पर्धा आयोजिता आसीत् कार्याननिर्मातृभिः । अत्र स्पर्धार्थिनः नगरस्य रेल–स्थानकतः विमानाश्रयपर्यन्तं तस्याः संस्थायाः अत्याधुनिक–विन्यासोपेतं कार्यानं चालयेयुः इति आसीत् नियमः ।

प्रस्थानस्थानं गम्यं च निर्दिष्टम् आसीत्, किन्तु मार्गः आसीत् ऐच्छिकः । सर्वप्रथमं यः गम्यं प्राप्नोति सः विजयी इति न गण्यते स्म तत्र । प्रत्युत प्रयाणावसरे येन न्यूनतमस्य इन्धनस्य उपयोगः कृतः भवति सः एव विजेता इति निर्णीयते इति घोषितम् आसीत् स्पर्धायोजकैः । स्पर्धान्ते रामः गोविन्दः चेति उभौ चितौ । तयोः कतरस्य भवेत् जयः इति परीक्षा प्रवृत्ता । रेलस्थानकतः विमानाश्रयपर्यन्तः कश्चन तादृशः मार्गः आसीत्, यश्च वक्रः समीपतरः च आसीत् । अपरः मार्गः ऋजुः, विशालः च । किन्तु ऋजुना मार्गेण गन्त्रा तु बहूनि मार्गावरोधकसूचकानि (ट्राफिक सिग्नल्स) क्रमितव्यानि भवन्ति स्म । वक्रमार्गेण गमने एषः क्लेशः न आसीत् । गोविन्दः वक्रेण निकटतरेण च मार्गेण प्रस्थितः । रामः ऋजुमार्गेण गतवान् । ऊहानुगुणं गोविन्दः एव आदौ प्राप्तवान् गम्यस्थानम् । किन्तु आश्चर्यं नाम जयः आसीत् रामस्य एव !! यतः गोविन्देन यावत् इन्धनम् उपयुक्तम् आसीत् ततोऽपि अल्पम् उपयुक्तम् आसीत् रामेण ।

प्रशस्तिस्वीकरणावसरे रामः विवृतवान् – ''निकटस्थमार्गेण गमनम् इन्धनसञ्चये सहायकं भवति इति तु भ्रान्तिः एव । गोविन्दः सामीप्यकारणतः वक्रमार्गेण गच्छन् मध्ये मध्ये वामतः दक्षिणतः च परिवृत्तिं कुर्वन् स्थगयन्, वेगं च वर्धयन् यन्त्रस्य शक्तिं व्यर्थतया उपयुज्य अधिकम् इन्धनम् उपयुक्तवान् । अहं विशालमार्गेण समवेगेन यानं चालयन्, याने स्थगिते यन्त्रं चापि स्थगयन् इन्धनव्ययं न्यूनीकृतवान् । यद्यपि मया विलम्बेन प्राप्तं, तथापि इन्धनरक्षणे अहमेव सफलः अभवम्'' इति । सत्यम् एव यत् वस्तुतः इन्धनव्ययः चालनक्रमं, मार्गचयनं च अवलम्बते इति ।

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते ...)

कविकुलगुरुविरचितेषु प्रबन्धेषु एकतमा कृतिः अभिज्ञानशाकुन्तलाभिख्यं नाटकम् । तत्रैतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुगतः दुष्यन्तः वैखानसेन कण्वशिष्येण बोधितः । तदनुरोधेन पुण्याश्रमं गतस्य तस्य शकुन्तलायै स्नेहं समुत्पन्नः । कालेन तयोः परस्परम् अनुरागः गाढतरः अभवत् । इष्टिकाले आपद्भ्यो निवारणार्थं ऋषिभिः आहूतः दुष्यन्तः । तत्रैव तान् रक्षन् सः स्थितः । तत्र तयोः गान्धर्वविवाहः जातः । ततः दुर्वासोमुनिशापप्रसङ्गः । कण्वेन दैवाद् दुष्यन्तशकुन्तलयोः विषये ज्ञातम् अनुज्ञातं च । ततः शकुन्तलां सज्जीकृत्य राजकुलाय निर्गताः सर्वे आश्रमाद् निर्गच्छन्तः विरहदुःखम् अनुभवन्ति । क्रमेण राजभवनं प्राप्ताः । तत्र राज्ञा परिणयः निषिद्धः तां च नानुजानात् । दुःखितास्ते गताः स्वस्थानम् । इतः रक्षकाभ्यां कश्चिद् धीवरः धृतः । तस्मात् काचिद् अङ्गुलीयकं प्राप्तम् । तामङ्गुलीयकं दृष्ट्वा स राजानं प्रति नीतः ।

मिश्रकेशी अप्सराः आकाशयानेन अवतरति । तत्र प्रमदवने द्वे चेट्यौ वसन्तस्य ऋतोः विलासं पश्यन्त्यौ वसन्तोत्सवाय उत्सुकिन्यौ आस्ताम् । तयोः एका चूतस्य अङ्कुरं गृहीत्वा जिघ्राति क्षिपति च । तदैव कञ्चुकीयेन समागत्य सरोषं ताभ्यां कथितं यद् मधूत्सवे निषिद्धे कथं ते चूतकलिकाभङ्गं कुरुतः इति । मधूत्सवस्य निषेधस्य कारणं ज्ञातुं ते तमेव पृच्छतः । कञ्चुकीयः उक्तवान् — धीवरकेन यद् अङ्गुलीयकं प्रत्यादिष्टं तद्दृष्ट्वा अनुस्मृतः राज्ञा स्वीयः शकुन्तलया सह विवाहः । मोहाद् राजा शकुन्तलां प्रत्यादिष्टवान् इति सः पश्चात्तापं प्राप्तः । राजा रात्रौ न सुखं शेते । अन्तःपुरस्त्रीषु अपि न तस्य महती रतिः । अनेनैव कारणेन मधूत्सवः प्रतिषिद्धः । इमं सर्वमपि वृत्तान्तं मिश्रकेशी पृष्ठतः शृणोति स्म ।

ततः प्रतिहार्या विदूषकेन च सहितः प्रविशति राजा । चेट्यौ निर्गच्छतः । राज्ञः आदेशं गृहीत्वा कञ्चुकीयः अपि स्वीयकार्यार्थं प्रस्थितः । राजा आत्मनः स्थितिं प्रविचार्य निःश्वसिति । तौ कालं वाहयितुं माधवीलतामण्डपं यातः । मिश्रकेशी अपि अनुगच्छति । राजा इतोऽपि निर्निमित्तं शकुन्तलायाः प्रेषणे आत्मनः एव अपराधं मनुते । विदूषकः वचोभिः तं सुखयति यद् भवितव्यता एव कारणं भवेत् । कारुण्यजनयित्री मनःस्थितिः राज्ञः । शकुन्तला कुत्र नीता स्यादिति चिन्ता बाधते तस्य मनः । विदूषकेन पृष्टः राजा यत् कथं तेन नाममुद्रा तस्यै प्रदत्ता । राज्ञा प्रत्युक्तम् — तपोवनाद् यदा सः प्रतिष्ठते स्म तदा पृष्टं तया शकुन्तलया यत् कियता कालेन स तां स्मरिष्यतीति । तदैव इयं नाममुद्रा तेन निवेशिता उक्तं च – **एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय यासि न तावदन्तम् ।**

तावत्प्रिये मदवरोधनिदेशवर्ती नेता जनस्तव समीपमुपैष्यतीति ॥६।१३॥

ततः तदङ्गुलीयस्य रोहितमत्स्ये प्राप्तिः कथं जाता इत्यपि पृष्टेन राज्ञा यथावृत्तं निगदितम् । ततः एव चित्रफलकेन सह चेटी प्रविष्टा । चित्रफलके शकुन्तलायाः चित्रमासीत् । सः तत्र शकुन्तलां दृष्ट्वा अत्यन्तं मुग्धः । सः स्वयमेव वर्णयति –

साक्षात् प्रियामुपगतामपहाय पूर्वं चित्रार्पितामहमिमां बहु मन्यमानः ।

स्त्रोतोवहां पथि निकामकलामतीत्य जातः सखे प्रणयवान् मृगतृष्णिकायाम् ॥६।१८॥

(क्रमशः...)

मासवार्त्ता:

सम्पन्न: संस्कृतग्रीष्मवर्ग:

मईमासस्य ४ दिनाङ्कत: १४ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-फाउण्डेशन-संस्थाने संस्कृतग्रीष्मशिबिरस्य आयोजनम् अभवत् । शिबिरेऽस्मिन् Sr. Kg. त: ८ कक्ष्याया: छात्राणां कृते बालसंस्कृतवर्गस्य आयोजनम् अभवत् । श्रीमती अमी गोहेल:, दिशा परमार: च छात्रेभ्य: मार्गदर्शनं प्रायच्छताम् । संस्कृतस्य अध्ययनेन छात्रा: सन्तुष्टा: आसन् ।

आरब्धौ संस्कृतभाषाशिक्षणवर्गौ

संस्कृतभाषाया: अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-फाउण्डेशन-संस्थानम् अनेकान् वर्गान् नियतम् आयोजयति । एतस्मिन् उपक्रमे मईमासस्य ४ दिनाङ्कत: संस्कृत-भाषाशिक्षणस्य द्वितीयस्तरस्य, मईमासस्य ११ दिनाङ्कत: संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य च आरम्भ: अभवत् । संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य समय: प्रात: ७ त: ८:३० वर्तते । द्वितीयस्तरस्य च समय: सायं ६:३० त: ८:०० वर्तते । अत्र उल्लेखनीयं यत् एकलव्य-संस्कृत-फाउण्डेशन-संस्थानेन छात्रा: Online एवं च Offline मिलित्वा पठितुं शक्नुयु: तथा व्यवस्था कृता वर्तते । उभयो: वर्गयो: आहत्य २४ छात्रा: प्रवेशं स्वीकृतवन्त: । एतौ वर्गौ जुलाईमासपर्यन्तं प्रचलिष्यत: ।

कृपया हसन्तु

पिता - (रमणं प्रति) भो: रमण ! तव वार्षिकी परीक्षा कथमासीत् ?

रमण: - भो: पित: ! परीक्षायाम् अहम् अनुत्तीर्ण: ।

पिता - रे मूर्ख ! इत: परं मां पित: ! पित: ! इति उक्त्वा मा आह्वयतु ।

रमण: - भो: पित: ! एषा तु केवलं वार्षिकी परीक्षा आसीत् न तु पितृत्वपरीक्षा खलु ?

★ ★ ★ ★ ★

रमण: - (नमनं प्रति) यानचालनसमये त्वं सूचकदीपस्य उपयोगं किमर्थं न करोषि ?

नमन: - मम इच्छा । नाहं कर्तुम् इच्छामि ।

रमण: - यदि सूचकदीपस्य उपयोगं करोषि तर्हि एव अन्ये चालका: अवगन्तुं शक्नुवन्ति यत् त्वं कुत्र गन्तुम् इच्छसि । वामत: वा दक्षिणत: वा ?

नमन: - अहं कुत्र गच्छामि ? केन मार्गेण गच्छामि ? इत्येतत् सर्वं मम विषय: । तत्र तै: किं ज्ञातव्यम् ?

रमण: - क्षम्यताम् ।

★ ★ ★ ★ ★

प्रात: मम कार्यालयस्य समीपे आगताय अन्धभिक्षुकाय दशरूप्यकाणि दत्त्वा मनसि ईश्वरं प्रति प्रार्थितवान् - 'हे ईश्वर ! एतस्य अन्धतां निवारयतु' इति । अहो ! आश्चर्यं सायंकाले अहम् अन्यत्र धूमपानं कुर्वन्तं वार्त्तापत्रिकां पठन्तं तमेव भिक्षुकं दृष्टवान् ।

सुभाषितम्

- संस्कृतविकिपीडियाजालस्थानात्

सद्वृत्तय: प्रकाशन्ते क्षीयन्ते दुष्टवृत्तय: ।
सुसंहिते समाजे हि रमन्ते खलु देवता: ॥

तात्पर्यम् – समाज: सङ्घटित: चेत् उत्तमा: मनोवृत्तय: प्रकाशिता: भवन्ति । दुष्टा: अहितकारिण्य: वृत्तय: नष्टा: भवन्ति । देवता: अत्र आनन्दम् अनुभवन्ति ।

सन्नियच्छति यो वेगम् उत्थितं क्रोधहर्षयो: ।
स श्रियो भाजनं राजन् ! यश्चापत्सु न मुह्यति ॥

तात्पर्यम् – क्रोधावसरे सन्तोषावसरे य: मनस: आवेगं निगृह्णीयात् विपतौ य: स्थिरं तिष्ठेत् स: सर्वा: सम्पत्ती: प्राप्नोति ।

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥

तात्पर्यम् – सामान्यजना: सौख्यकाले आनन्देन अत्युत्सुका: भवन्ति । कष्टकाले निरुत्साहिन: सन्त: असहायकताम् अनुभवन्ति । किन्तु महापुरुषा: न तथा । सम्पत्ते: प्राप्तौ तेषां मन: कमलवत् कोमलं भवति । आपत्तौ ते किञ्चिदपि विचलिता: न भवन्ति । महापर्वतस्य शिला इव नितरां दृढं तिष्ठन्ति ।

ज्ञानसरित्

श्यामः पटेलः

दीर्घजीवी वनस्पतिः – वेलविशिया मिराबिलिस

समग्रायां प्राणिसृष्टौ वृक्षाणाम् आयुः एव सुदीर्घं भवति। तेषामपि अफ्रिकोपमहाद्वीपस्य पश्चिमसमुद्रतटीये नामिबियादेशस्य अङ्गोलादेशस्य च मरुभूमौ उद्भवतः वनस्पतेः आयुः सुदीर्घमस्ति।

ख्रिस्ताब्दस्य १८६०तमे वर्षे 'द फ्रेडरिक वेलविश' अभिधेन वैज्ञानिकेन अस्य वनस्पतेः अन्वेषणं कृतमासीत्। अत एव एषः 'वेलविशिया मिराबिलिस' नाम्ना प्रसिद्धिं गतः। अस्य समग्रे जीवने केवलं पर्णद्वयमेव उद्भवति। गच्छता कालेन मरुभूमेः चण्डवातेन पर्णद्वयस्यापि विभजनं भवति। कालक्रमेण विभक्तेभ्यः पर्णेभ्यः अपि पुनः विभजनप्रक्रियया विकासयात्रा प्रचलति। हरितवर्णीयानामस्य पर्णानां दैर्घ्यं द्वितः त्रिमीटरमितं यावत् भवति। अयं पर्णानां छिद्रैः समुद्रतटीयात् बाष्पात् जलं शोषयति तथा एकं मूलं भूमौ गहनं प्रवेश्य जलस्रोतः आपयित्वा दीर्घं जीवति। अस्य बृहद्पर्णानां छाया सूर्यातपात् मूलानां रक्षणं करोति। एतेन एव कारणेन अफ्रिकोपमहाद्वीपे २००० वर्षेभ्यः पुरातनानि वेलविशिया-वनस्पतेः सस्यानि प्राप्यन्ते। डायनासोर इत्याख्यस्य पशोः युगात् अस्य अस्तित्वं सिद्ध्यति। अस्य बीजानि फलस्य अन्तः न भवन्ति प्रत्युत स्वतन्त्ररूपेण अस्तित्वं विदधति। सम्प्रति विश्वस्य नैकेषु वनस्पतिशोधसंस्थानेषु एनं द्रष्टुं शक्यते। भवन्तः अपि अस्य दर्शनार्थं दीर्घायुषः आशिषं प्राप्तुं वा लखनौनगरस्य CSIR-National Botanical Research Institute इत्याख्यं संस्थानं गन्तुं शक्नुवन्ति।

शब्दमञ्जूषा

नित्यता	नैरन्तर्य	constancy
विकचः	खिला हुआ	expanded
गड्डरिका	भेडों की पंक्ति	line of sheep
अभ्यर्थनम्	प्रार्थना	request
उल्कुषी	उल्का	meteor
प्रललाटः	उन्नत मस्तक वाला	having a prominent forehead
बलीशः	कौवा	crow
व्यतिषङ्गः	पारस्परिक संबंध	mutual relation
जन्युः	जन्म	birth
उपप्रदानम्	सौंप देना	entrusting
रुक्षः	खुरदरा	coarse
निवृतः	घिरा हुआ	surrounded
अपर्णः	बिना पत्तों का	leafless
रामण्यकम्	सौन्दर्य	loveliness
प्रजुष्टः	अनुरक्त	attached to

किं भवन्तः जानन्ति ?

१) 'डण्डा नाटा' नृत्यशैली केन प्रान्तेन सह सम्बद्धा वर्तते ?
(क) कर्नाटकेन (ख) राजस्थानेन (ग) उडीसया (घ) मध्यप्रदेशेन

२) एतासु का नृत्यशैली राजस्थानेन सह सम्बद्धा वर्तते ?
(क) तेरा-ताली (ख) सिन्धि-छम (ग) गरबा (घ) भाँगड़ा

३) 'पाई डण्डा' नृत्यशैली केन क्षेत्रेण सह सम्बद्धा वर्तते ?
(क) बुन्देलखण्डेन (ख) उत्तराञ्चलेन (ग) छत्तीसगढेन (घ) झारखण्डेन

४) एतासु का नृत्यशैली सिक्किमेन सह सम्बद्धा वर्तते ?
(क) सिन्धि-छम (ख) डाँडिया (ग) गरबा (घ) पाई डण्डा

५) 'धनगिरि गाजा' नृत्यशैली केन प्रान्तेन सह सम्बद्धा अस्ति ?
(क) महाराष्ट्रेण (ख) पञ्जाबेन (ग) बिहारेण (घ) हिमाचलप्रदेशेन

६) 'पेरियामेलन' नृत्यशैली केन प्रदेशेन सह सम्बद्धा अस्ति ?
(क) कर्नाटकेन (ख) तमिलनाडुना (ग) आन्ध्रप्रदेशेन (घ) असमेन

७) भारतीयनृत्यशैली 'कथकलि' केन प्रान्तेन सह सम्बद्धा अस्ति ?
(क) असमेन (ख) छत्तीसगढेन (ग) केरलेन (घ) बिहारेण

उत्तराणि – (१) ग (२) क (३) क (४) क (५) क (६) ख (७) ग

अस्माकम् आगामिकार्यक्रमा:

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

(Offline)

Value Education Through Sanskrit

बालसंस्कृतवर्ग:

(Class SKg to 8)

Date : 14/6/26 to 28/3/27
Day : Sunday
Time : 11.00am to 12.30pm
Fees : ₹ 8500/-

Why learn Sanskrit?

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

(Online / Offline)

Value Education Through Sanskrit

बालसंस्कृतवर्ग:

(Class SKg to 8)

Date : 13/6/26 to 27/3/27
Day : Saturday
Time : 6.00pm to 7.30pm
Fees : ₹ 8500/-

Why learn Sanskrit?

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

संस्कृत-
साम्प्रतम्

नमस्कार:

यदि भवन्त: "साम्प्रतम्" मासिकीपत्रिकाया: ग्राहका: भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

Learn Online

सन्धि:

Date : 02/07/2026 to 30/07/2026
Day : Tuesday-Thursday
Time : 07:00 am to 8:30 am
Fees : Rs. 2500/-

Contact: Dr Mihir Upadhyay, 98246 16237

प्रियवाचका:

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्या: लेखा:, कथा:, हास्यकणिका: वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकाया: विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006